द्वैततत्त्वदीपनम्

श्रीसुशीलेन्द्रतीर्थानामन्तेवासिभिः गुरुराजाचार्यैः
विरचितम्

गौरवसम्पादकाः
वेदान्तकेसरी श्री राजा एस्. गिरि आचार्याः

सम्पादकाः
विद्वान् श्री एस्. वि. भीमभट्टमहोदयाः
विद्वान् श्री राजा एस्. पवमानाचार्याः

प्रकाशकाः
अध्यक्षाः
श्रीगुरुसार्वभौमसंस्कृतविद्यापीठम्
मन्त्रालयः–518345 A.P.

द्वैततत्त्वदीपनम्

श्रीसुशीलेन्द्रतीर्थानामन्तेवासिभिः गुरुराजाचार्यैः
विरचितम्

गौरवसम्पादकाः
वेदान्तकेसरी श्री राजा एस्. गिरि आचार्याः

सम्पादकाः
विद्वांसः श्री एस्. वि. भीमभट्टमहोदयाः
विद्वांसः श्री राजा एस्. पवमानाचार्याः

प्रकाशकाः
अध्यक्षाः
श्रीगुरुसार्वभौमसंस्कृतविद्यापीठम्
मन्त्रालयः–518345 A.P.

प्रथमावृत्तिः क्रि. श. १९९५

१००० प्रतीकानि

मुद्रकः

डि. यस्. कृष्णाचार्यः, प्रभा मुद्रणालयः, बेंगळूरु - 560 004

पूर्ववाणी

आपादमौलिपर्यन्तं गुरूणामाकृतिं स्मरेत् ।
तेन विघ्नाः प्रणश्यन्ति सिध्यन्ति च मनोरथाः ॥

मूकोऽपि यत्प्रसादेन मुकुन्दशयनायते ।
राजराजायते रिक्तो राघवेन्द्रं तमाश्रये ॥

सुधाद्यमलसद्बोधं सुकीर्तिविलसद्दिशम् ।
सुधीसंस्तुत्य सुगुणं सुशीलेन्द्रगुरुं भजे ॥

भो भोः समीरसमयतत्त्वज्ञानामृतपानरसिकाः सरसहृदयाः अन्तर्वाणयः महदिदं प्रमोदस्थानमस्माकं यदिदानीं वयं हरिवायुगुरूणां परमानुग्रहेण एतावत्पर्यन्तमन्तर्निगूढां काञ्चन अन्तर्वाणेरन्तर्वाणीं वाणीपत्याद्यखिललेखवन्द्यस्येन्दिरारमणस्य सर्वोत्तमत्वप्रतिपादिकां मुद्रितग्रन्थरूपेण बहिर्वाणीं कर्तुं प्राभवाम इति। परमपूज्यानां श्री सुशीलेन्द्रतीर्थश्रीमच्चरणानां विद्याशिष्याः श्रीराघवेन्द्रमठीयाः महापण्डिताः श्री गुरुराजाचार्याभिधानाः द्वैततत्त्वदीपनं नाम ग्रन्थं प्राणैषुः, यस्य प्रकाशनमिदानीमस्मद्द्वारा श्रीहरिः कारयतीति तस्यापाराकृपायाः असीममहिमैवायम् ।

श्रीमन्मध्वमते हरिः परतरः इति प्रतनपद्योल्लिखितप्रथम प्रमेयमधिकृत्य निबद्धोऽयं पाण्डित्यपूर्ण उपन्यासः। एतत्परिशीलनेन हरिभक्ताः नितरामानन्दमाप्नुवन्तीत्यत्र नास्माकं विशयलेशोऽपि ।

हरिसर्वोत्तमत्वप्रतिपादनं नाम चर्वितचर्वणम् ज्ञातार्थस्यैव आम्रेडनम्, स्फीतालोकमध्यवर्तिघटं प्रदर्श्य पश्येमं घटमिति वचनोद्गिरणम्, हस्तस्य पंचांगुलीः प्रसार्य पश्यन्तं प्रति पश्य तवेमाः पञ्चांगुलयः इति वाक्यसमुदीरणम्, इत्यद्याक्षेपान् केचन ब्रूयुः । परन्तु ग्रन्थेऽत्रानुसृता रीतिस्तु पण्डितानां सामान्यतः श्रद्धालूनामप्यतिमात्रानन्दजननी पूर्वोक्तदोषास्पृष्टा जननीवागिवार्भकान् परितोषयति ।

विशेषतः, चतुर्मुखनाडीग्रन्थोदाहरणम्, नारायणशब्देणत्वोपपादकनूतनमार्गानुसरणम् इत्यादयो विमर्शाः नूनमिदंप्रथमे प्रतिभान्ति । किञ्च श्रीविजयीन्द्रकृतानेकप्रवन्धानुसृतमार्गगामिन एते ग्रन्थकाराः तदीयग्रन्थोल्लेखपुरस्सरं तद्वाग्वैखरीं स्मारयन्ति । श्रीवादीन्द्रकृतनव्यदुरुक्तिशिक्षायाः भाविसमीरश्रीवादिराजयतिसार्वभौमप्राप्तयुक्तिमल्लिकायाश्च नाम ग्राहं ग्राहं हरेः सर्वोत्तमत्वं प्रतिपादयदिदं ग्रन्थरत्नं अध्यात्मतत्त्वरसिकानाममृतप्राशनसदृशमिति निश्चप्रचं ब्रूमहे ।

ग्रन्थकारैरेभिरेव सत्यं जगत् इत्यादिप्रमेयरत्नान्तराणां प्रकाशाविष्करणं कृतं स्यादिति अनुमिमीमहे । ग्रन्थेऽन्तिममंगलाभावादेतदूह्यते । ग्रन्थकारा अपि तच्चोत्तरत्र प्रदर्शयिष्यामः इति वदन्तः एते अवशिष्टप्रमेयान्यपि समीचीनोपन्यासरूपेण न्यरूरुपन् इत्यनुमिनुमः ।

अस्य ग्रन्थस्य एकमेव मूलप्रतीकं श्रीगुरुसार्वभौमसंस्कृतविद्यापीठतो लब्धम्, यत्कृते तत्राधिकृतान् अभिनन्दामः । मूलमातृकामवलंब्य सुन्दरैरक्षरैः मुद्रणोपयोगिहस्तलिखितप्रतिकृतिं संपादितवद्भ्यः विद्वद्भ्यः

कडपा राघवेन्द्रचार्येभ्यः सुन्दरमुद्रणकृते प्रभामुद्रणालयाधिकृतेभ्यः कृष्णाचार्यमहाशयेभ्योऽपि धन्यवादान् समर्पयामः ।

समग्रस्यैतस्य ग्रन्थस्य परिशीलनं कुर्वद्भ्यः भक्तेभ्यः श्रीराघवेन्द्रगुर्वन्तर्गतः श्रीमुख्यप्राणस्वामी रमाजानिः सुप्रीतो वरदो भवतु इत्याशास्य विरमामः ।

एवमावेदयितारः

गौरवसंपादकाः

पण्डितकेसरीत्यादिबिरुदभाजः

मन्त्रालयः — **राजा एस्. सुज्ञानेन्द्राचार्याः**


युवसंवत्सरीया — **विद्वांसः एस्. वि. भीमभट्टमहोदयाः**

ज्येष्ठशुद्धपूर्णिमा — **राजा एस्. पवमानाचार्याः**

13–6–1995 — संपादकाः


भक्तजनकामधेनवः

श्रीराघवेन्द्रतीर्थगुरुसार्वभौमाः



मूकोऽपि यत्प्रसादेन मुकुन्दशयनायते ।
राजराजायते रिक्तः राघवेन्द्रं तमाश्रये ॥

श्रीसुजयीन्द्रतीर्थश्रीपादाः



पूर्णप्रमत्यागमकन्दराश्रयः दुर्वादिकुम्भीन्द्रविदारणक्षमः ।
तर्कादिशास्त्राग्र्यसटाविभूषितः जीयाच्चिरं श्रीसुजयीन्द्रकेसरी ॥

॥ श्रीः ॥

श्री सुशीलेन्द्रतीर्थानामन्तेवासिगुरुराजाचार्यविरचितं

द्वैततत्वदीपनम्

पूर्णाखिलानन्दचिदादिसद्गुणं
पूर्णप्रबोधार्चितपादपल्लवम् ।
पद्माप्रियं पद्मगदादिधारिणं
पद्मेक्षणं सम्प्रणमामि मेशम् ॥ १ ॥

वन्दे श्रीसुखतीर्थदेशिकमुमानाथाहिवीशाधिपैः
वन्द्यं श्रीजयतीर्थमस्करिमणिं दुर्वादिशुष्कानलम् ।
द्वैताम्बोधिकलानिधिं यमितुतं श्रीचन्द्रिकाकृद्गुरुं
धूताशेषदुरागमं जितसुराचार्यं जयीन्द्राभिधम् ॥ २ ॥

दुर्गाहसंसृतिजलाधिपतारणप्लवं
दुर्वादिशुष्ककदलीवनवृन्दयूथपम् ।
सर्वंसहासुरसमीहितकल्पपादपं
श्रीराघवेन्द्रयमिपुङ्गवमाश्रये सदा ॥ ३ ॥

सुशीलेन्द्रमुखार्यांघ्रिवारिजासक्तचेतसा ।
गुरुराजाभिधाभाजा तन्यते तत्वदीपनम् ॥ ४ ॥

काव्ये नो कुशलो न पाणिनिनये नाक्षांघ्रिशास्त्रेषु च
नो द्वैते न च जैमिनीयनिगमे नो वेदचर्चासु च ।
किन्तु श्रीगुरुराघवेन्द्रकरुणामालम्ब्य विद्वन्मुदे
कुर्वे मन्दमतिस्त्विमं मयि दयां कुर्वन्तु विद्वद्वराः ॥ ५ ॥

इह विरिञ्चिरचितविविधप्रपञ्चे ज्ञानलेशविधुराऽचेतनवर्गत- श्चेतनवर्गस्य तत्रापि हिताहितप्राप्तिनिवृत्तिसाधनविचारशालिनां मानवजन्मनां तेषु च दुर्गाह्यामितसंसृतिसागरसमुत्तीर्णतापुरस्सरं नैजसुखानुभवाप्तेरुपायप्रतिपादनपरवेदाधिकारवतः अत एवाग्र- जन्मेत्यन्वर्थकनामभाजः ब्राह्मणजनेः प्राधान्यम् । तदुक्तम्—

"अतुलं नृषु वैष्णवं सुजन्माच्युत ! दत्तं कृपया त्वयाप्यवाप्य"
"तेषां दुःखप्रहाणाय श्रुतिरेषा प्रवर्तते" । इति ॥

अनन्तप्राक्तनजन्मस्वार्जितसुकृतपरितोषितश्रीशप्रसादायत्तोत्तम - जन्मवता प्राणिना साङ्गो वेदोऽध्येतव्यः । "**स्वाध्यायोऽध्ये- तव्य**" इति श्रुतिरमुमेवार्थं प्रतिपादयति । कृत्स्नो वेदोऽधि- गन्तव्युस्सरहस्यो द्विजन्मना[1] " ।

यश्च काष्ठमयो हस्ती यश्च चर्ममयो मृगः ।
यश्च विप्रोऽनधीयानस्त्रयस्ते नामधारकाः ।
(वासिष्ठे)

[1] मनुस्मृतिः अ २ श्लो. १५७

योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः[1] ॥

इति वाक्यानि च । न केवलं वेदाध्ययनेनैव समीहितलाभः । किन्तु तदर्थावधारणेन च । उक्तञ्च—

न वेदपाठमात्रेण सन्तुष्टो वै भवेद्द्विजः ।
पाठमात्रावसायी तु पङ्के गौरिव सीदति ॥
यथा पशुर्भारवाही न तस्य भजते फलम् ।
द्विजस्तथार्थानभिज्ञो न वेदफलमश्नुते ॥
योऽधीत्य विधिवद्वेदं वेदार्थं न विचारयेत् ।
स सान्वयः शूद्रसमः पात्रतां न प्रपद्यते ॥
इति च ।

स च वेदार्थ इतिहासपुराणादिपरिशीलनेनैव निष्पद्यते नान्यथा ।

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रचलिष्यति ॥
इति चावगमात् ।

ननु नेदमुचितम् । अनुमानेन पाशुपतादिशास्त्रेण च तादृश- साधनावधारणसंभवेन किं वा साङ्गवेदार्थावधारणेनेति चेन्मैवम् । उक्तसुखसाधनं भगवानब्जनाभो नारायण एव[2] ।

[1] मनुस्मृतिः अ. २ श्लो. १६८. [2] स चागमैकवेद्यः, 'नेन्द्रि- याणि नानुमानं वेदा ह्येवैनं वेदयन्ति' इति श्रुतेः । तत्स्वरूपविषये नारायणोऽसौ इत्यादि प्रमाणम् ।

*

नारायणोऽसौ परमो विचिन्त्यो
मुमुक्षुभिः कर्मपाशादमुष्मात् ।
(नारायणश्रुतिः)

ध्येयः सदा सवितृमण्डलमध्यवर्ती
नारायणस्सरसिजासनसन्निविष्टः ॥

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥

इति प्रमाणात् । स च सव्यापारीकरणीयः । लोके छिदासाधन-कुठार उद्यमननिपतनव्यापारवानेव फलोपधायको दृष्टः । स च व्यापारः अदृष्टरूपः ।

यस्य प्रसादात्परमार्तिरूपा-
दस्मात्संसारान्मुच्यते नापरेण ।
(नारायणश्रुतिः)

मत्प्रसादात्तरिष्यन्ति,

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ॥
इत्यवगतेः ।

स चैनं मोचयामीति इच्छारूपः । स च भक्त्यधीनः ।
“ भक्त्यैव वृणुते विष्णुः ” “ भक्त्या त्वनन्यया लभ्यः ”
“ भक्त्या तुतोष भगवाननु यूथपाय ”

व्याधस्याचरणं ध्रुवस्य च वयो विद्या गजेन्द्रस्य का
का जातिर्विदुरस्य यादवपतेरुग्रस्य किं पौरुषम् ।
कुब्जायाः कमनीयरूपमधिकं किं तत्सुदाम्नो धनं
भक्त्या तुष्यति केशवो न तु धनैः भक्तिप्रियः केशवः ॥

पुरुषः स परः पार्थ ! भक्त्या लभ्यस्त्वनन्यया ।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ।
इति प्रमाणात् ।

भक्तिश्च— “ निरवधिकानन्तानवद्यकल्याणगुणत्वज्ञानपूर्वकः ” इत्यादिसुधोक्तरीत्या परमप्रेमप्रवाहरूपैव । न च तपोयोगदान-तीर्थादिभिरपि उक्तफलप्राप्तिसम्भवेन किं भक्त्या प्रयोजनमिति वाच्यम् ।

तपोयोगादयो धर्माः मार्गास्सन्ति तथापि हि ।
समीचीनस्तु मद्भक्तिमार्गस्संसरतामिह ।
दानतीर्थतपोयज्ञपूर्वास्सर्वेऽपि सर्वथा ।
अङ्गानि हरिसेवायां भक्तिस्त्वेका (विमुक्तये) गरीयसी ।
द्वादश्यादिव्रतं चैव तुलस्याद्यैरथार्चनम् ।
सर्वं भक्त्यर्थमुद्दिष्टं निष्फलं तु तया विना ।

इत्यादिप्रमाणैस्सर्वेषां भक्त्यङ्गत्वावगमात् । सा च भक्तिः अपरोक्षदृगेकसाध्या,

ज्ञानी प्रियतमोऽतो मे, अहं स च मम प्रियः ।
(गी. ७-१७)

यथा दृष्टया प्रसन्नस्सन् राजा बन्धापनोदकृत्[1] ।
एवं दृष्टस्स भगवान् कुर्याद्बन्धविभेदनम् ॥ इति ।

सा च दृक् परोक्षज्ञानाधीना—

"न संदृशे तिष्ठति रूपमस्य
न चक्षुषा पश्यति कश्चनैनम् ।
हृदा मनीषा मनसाऽभिक्लृप्तो
य एनं विदुरमृतास्ते भवन्ति" ॥

इत्यनेन शुद्धान्तःकरणतया शास्त्रजन्यपरोक्षज्ञानादेव तद्दृशः सम्भव इत्यवगमात् "आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य" इति च । तथा चोक्तसुखसाधनमार्गः आगमैकवेद्य एवेति सिद्धम् ।

नन्वनेनागमवेद्यत्वावगमेऽपि अनुमानवेद्यत्वाङ्गीकारे बाधकविरहेण आगम एवाभ्यसनीय इति चायुक्तमिति चेत् । "औपनिषदः पुरुषः" "नैषा तर्केण मतिरापनेया । प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ" इत्यनेनानुमानाद्यवेद्यत्वावगतेः, तस्य

॥ ॐ कामाच्च नानुमानापेक्षा ॐ ॥

श्रुतिसाहाय्यरहितमनुमानं न कुत्रचित् ।
निश्चयात्साधयेदर्थं प्रमाणान्तरमेव च ॥

इत्यादिश्रुतिसूत्रादिभिः केवला—[श्रुतिसाहाय्यरहिता]नुमानस्य

[1] अनुव्याख्या जि. अ. ४१-४२

प्रामाण्यनिषेधात् केवलेन तेन तादृगुपायप्रतिपत्तेरयोगात् । तच्च शास्त्रमपौरुषेयमेव । इतरेषां वक्तुरज्ञानादिदोषशङ्कया सन्दिग्धाप्तिकत्वेन प्रामाण्यसन्देहात् अपौरुषेये च पुरुषदोषनिबन्धनदोषशङ्काया अभावेन अप्रामाण्यग्राहकसामग्रीवैधुर्येण स्वतःप्रामाण्यमेव सेत्स्यति ।

न चेश्वराद्युच्चरितपाशुपतादिनैव तत्प्रतीतिसम्भवेन अलमपौरुषेयवचनाङ्गीकारेण । न च तेषामाश्वासकारणाभावः परमाप्तत्वेन तत्साधनादिति वाच्यम् । भवेदेतत् यदि पशुपत्यादीनामाप्तत्वं निश्चितं भवेत्; तदेव न, प्रमाणाभावात् । वक्तव्यार्थतत्त्वज्ञानं अविप्रलम्भः विवक्षा करणपाटवं चेत्येतत् **आप्तत्वम्**, एतेषां परिच्छित्तवृत्तीनां प्रत्यक्षासम्भवात् । नापि तत्रानुमानं मानम्, तत्साधकलिङ्गाभावत्, वाक्यं यदि पौरुषेयं गमकं, तस्यापि उक्तरीत्या अप्रामाण्यशङ्काकलङ्कितया असाधकत्वात् । नाप्यपौरुषेयं वचः, तस्यानङ्गीकारात्, ततः प्रमाणेन विना कस्मिंश्चित्पुरुषे अविप्रलम्भादयः कल्प्या एव । एवं तस्य पुरुषस्याप्तत्वमात्रेणास्य वाक्यस्य न प्रामाण्यसिद्धिः । किन्तु तद्रचितत्वनिश्चयेन । अतः कस्मिंश्चिद्वाक्ये तत्पुरुषप्रणीतत्वमपि कल्प्यमेवेति गौरवम् ।

लोके प्रमाणेन विना कस्यचित्पुरुषस्याप्तत्वं तदुच्चरितत्वं च कस्यचिद्वाक्यस्य परिकल्प्य तदर्थनिश्चयं प्रेक्षावन्तो न हि कुर्वन्ति, किन्तु इतरप्रमाणैस्तस्य प्रामाण्यं निश्चित्यैव । अतो

रुद्रादीनामाप्तत्वानिश्चयेन तद्वाक्ये प्रामाण्यनिश्चयाभावात् । तदुक्तं—

अविप्रलम्भस्तज्ज्ञानं तत्कृतत्वादयोऽपि च ।
कल्प्या गौरवदोषेण पुंवाक्यं ज्ञापकं न[1] तत् ॥ इति ।

एवं—

त्वं च रुद्र महाबाहो मोहशास्त्राणि कारय ।
अतथ्यानि वितथ्यानि दर्शयस्व महाभुज ।
प्रकाशं कुरु चात्मानमप्रकाशं च मां कुरु ॥ इति ।

तस्य मोहशास्त्रत्वावगतेः, न तेन तदुपायप्रतीतिः, अतः अपौरुषेयं वचोऽङ्गीकरणीयम् । न च रुद्रादिवचनेन तद्वस्तुप्रतीतिर्मास्तु, तथापि परमाप्तत्वेनावधारितभगवद्वचसैव सा प्रतीतिर्भवतु, किमपौरुषेयवचसेति वाच्यम् । किं भगवान् सर्गादिसमये कमलोद्भवाय पूर्वकल्पीयवेदं विस्मृत्य वेदान्तरमुपदिदेश । तमेव वा, नाद्यः सर्वज्ञस्य अपास्तसमस्तदोषनिकरस्य ब्रह्मणो विस्मरण-कल्पनानौचित्यात् । द्वितीये तु प्रवाहतोऽनादिसर्गपरम्परया तस्य वेदस्यानादित्वमेव सिध्यति ।

वेदस्यापौरुषेयत्वं च—वाचा विरूपनित्यया, नित्ययाऽ-नित्यया स्तौमि "वेदान्तकृद्वेदविदेव चाहम्" इति प्रमाण-प्रमितं च । ततश्चापौरुषेयवचसोऽवश्यमङ्गीकार्यत्वेन तेनैव

[1] अनुव्याख्या—जि.अ. ६९

तदुपायावगतेश्च सुखेप्सुना निगमो निरन्तरमभ्यसनीय इति स्थितम् । तदनुकूलं भारतपञ्चरात्रादिकं च तत्र मानम् ।

ऋग्यजुस्सामाथर्वाश्च भारतं पञ्चरात्रकम् ।
मूलरामायणं चैव शास्त्रमित्यभिधीयते ॥

यच्चानुकूलमेतस्य तच्च शास्त्रं प्रकीर्तितम् ।
अतोऽन्यो ग्रन्थविस्तारो नैव शास्त्रं कुवर्त्म तत् ॥

इति प्रमाणात् ।

एतेनागमादिवत् अनुमानस्यापि स्वतन्त्रस्य नियतप्रामाण्यं, तेनापि तद्वस्तु सिद्धिस्सम्भवतीत्येतत् अस्मदाचार्यपरमसिद्धान्त-प्रमेयमिति जल्पतामाधुनिकानां पण्डितम्मन्यानां आशयोऽपि निरस्तः । उक्तप्रमाणविरोधात् । पूर्वापरवाक्यार्थपरिशीलन-मूलकं, उत वाक्यार्थभ्रमनिमित्तकं वा तज्जल्पनमिति । एवं च—

अनन्तशास्त्रं बहु वेदितव्यं
अल्पश्च कालो बहवश्च विघ्नाः ।
यत्सारभूतं तदुपासितव्यं
हंसो यथा क्षीरमिवाम्बु(मध्यात्)मिश्रम् ॥ इति

अभियुक्तवचसा वेदशास्त्राणां "अनन्ता वै वेदाः" इत्यादि-भिरानन्त्यावगतेः, कालस्य चाल्पत्वेन विघ्नानां बाहुल्यात् यदेत-त्सारभूतं तदेतदभ्यसनीयमिति ।

तदेतद्वेदादिशास्त्रं कालबलेन गौतमशापेन च नष्टज्ञानानां, अत एव तत्वेऽन्यथाप्रतिपत्तीनां संशयवतां च दुरवबोधं विजानद्भिः सच्छोकक्रपालुभिः पद्मासनप्रभृतिभिरमरेन्द्रैः अर्थितो भगवान्नारायणो व्यासत्वेन सत्यवत्यां पराशरादवतीर्य वेदं विभज्य तदर्थनिर्णयाय चतुःषष्ट्यधिकपञ्चशत(५६४)सङ्ख्याकसूत्रात्मकं द्वाविंशत्यधिकद्विशत(२२२)संख्याकाधिकरणात्मकं "ॐ अथातो ब्रह्मजिज्ञासा" इत्यारभ्य अनावृत्तिश्शब्दादनावृत्तिश्शब्दादित्यन्तं श्रुत्यर्थनिर्णायकन्यायग्रथनात्मकं ब्रह्ममीमांसाशास्त्रं रचयामास ।

तत्रादिमसूत्रे—विषयप्रयोजनाधिकारिसम्बन्धप्रतिपादनेन जिज्ञासाकर्तव्यत्वसमर्थनद्वारा शास्त्रस्यारम्भणीयता समर्थिता । द्वितीये—आदिसूत्रघटकब्रह्मशब्देन विषयीभूतब्रह्मणि सूचितं गुणपूर्णत्वलक्षणमसम्भावितमिति शङ्का, ब्रह्मशब्दवाच्ये जगज्जन्मादिकारणत्वश्रवणेन तच्च नारायणस्य प्रमाणप्रमितमिति नासम्भावितमिति निरस्ता । अथवा ब्रह्मशब्दो विष्णौ यौगिकः जीवे च "बृहज्जातिजीवकमलासनशब्दराशिष्वि"ति प्रमाणेन रूढत्वात्, योगाद्रूढेर्बलीयस्त्वेन जीववाचक एव ब्रह्मशब्दः, तस्य जीवस्य स्वप्रकाशत्वेन नित्यसिद्धस्य सन्दिग्धत्वाभावेन विषयत्वासम्भवेन जिज्ञासानिर्विषयेत्यादिशङ्का ब्रह्मशब्दवाच्ये "यतो वा इमानि भूतानि जायन्त" इत्यागमेन जगज्जन्मादिकारणत्वं श्रूयते, तच्च जीवे बाधितमतो रूढ्यर्थं परित्यज्य यौगिकार्थ एवाङ्गीकरणीयः तस्य च सन्दिग्धत्वेन विषयत्वसम्भवेन जिज्ञासा सविषयैवेति परिहृता ॥

तृतीये—अनुमानेन पाशुपतादिना वा विष्णोरन्यस्यापि जगत्कारणत्वसाधनसम्भवेन पूर्वोक्तलक्षणमतिव्याप्तमित्याशङ्क्य जगत्कारणस्य शास्त्रैकसमधिगम्यत्वेन श्रुतिसाहाय्यरहितानुमानस्य प्रामाण्यासम्भवेन पाशुपतादीनां कुशास्त्रत्वप्रतिपादनेन नातिव्याप्तिरुक्तलक्षणस्येति समाहितम् ॥

चतुर्थे—वेदेऽपि रुद्रादीनां जगत्कारणत्वप्रतिपादनात् कथमेतदित्याशङ्का, उपक्रमोपसंहारादिभिरेव वेदार्थो निर्णेयः नान्यथा, तथाच रुद्रादेर्जगत्कारणतापरत्वे वेदस्योपक्रमाद्यनानुगुण्याद्विष्णुरेव उपक्रमादिबलेन वेदादिप्रतिपाद्य इति तस्यैव जगत्कारणत्वमिति निराचक्रे ॥

पञ्चमे—"यतो वाच" इत्यादिश्रुत्या तस्यावाच्यत्वावगमेन शास्त्रप्रतिपाद्यत्वं न संभवतीत्येतत् । "आत्मन्येवात्मानं पश्ये-" दित्यादिश्रुतेक्षणीयत्वान्यथानुपपत्त्या अनुमानाद्यवेद्यस्य ब्रह्मणो वाच्यत्वं समर्थितम् । तदनन्तरं इन्द्रादिदेवतानां तत्तत्पदप्रवृत्तिनिमित्तधर्मवत्त्वे ब्रह्मण्येव गुणपूर्णत्वं न सम्भवतीति नामलिङ्गात्मनां द्विविधानां अन्यत्रोभयत्रान्यत्रैव प्रसिद्धानां शब्दानां परममुख्यवृत्त्या समन्वयप्रतिपादनेन गुणपूर्णत्वं सुसाधितमाध्यायसमाप्ति ।

द्वितीयेऽध्याये उक्तार्थे युक्ति-समय-श्रुति-न्यायोपेतश्रुतिविरोधपरिहारेण निर्दोषता समर्थिता । तृतीये वैराग्यादि साधनम् । चतुर्थे मोक्षादिस्वरूपप्रतिपादनेन फलं च प्रतिपादितम् ।

तदेतद्ब्रह्ममीमांसाशास्त्रमपि कालबलतः दुर्भाष्यगणसन्तमसान्धीभूतैरधिकारिभिर्न तत्वतोऽधिगन्तुं सुशकमिति सन्मार्गात्स्खलतः सतउद्दिधीर्षुभिर्हंसवाहनप्रमुखामरेन्द्रगणैरभ्यर्थितस्य कृपापारावारस्य भगवतः श्रीजानेराज्ञां शिरसि परमादरेण निधाय वृन्दारकेन्द्रयाच्ञां हृदा बिभ्रत् असूयेर्ष्याद्यशेषमनोदोषनिवर्तकः प्राणिगणनायकः पावनः पवनः वासुदेवाभिधया भूमौ पाजकक्षेत्रेऽवतीर्य पूर्णप्रज्ञेत्याद्यन्वर्थकनामा तदेतद्ब्रह्ममीमांसाशास्त्रव्याख्यानेन श्रीमन्नारायणपरतत्वप्रमुखप्रमेयप्रतिपादकं तत्ववादेत्यन्वर्थकाभिधं द्वैतशास्त्रं प्रकटीचकार ।

तन्मतप्रधानप्रमेयसंग्राहकपद्यं प्रत्नैर्व्यरचि—

श्रीमन्मध्वमते हरिः परतरः सत्यं जगत्तत्वतो
भेदो जीवगणा हरेरनुचराः नीचोच्चभावं गताः ।
मुक्तिर्नैजसुखानुभूतिरमला भक्तिश्च तत्साधनं
ह्यक्षादित्रितयं प्रमाणमखिलाम्नायैकवेद्यो हरिः ॥ इति ।

तत्र श्रीमन्मध्वमते इत्यस्य मध्वस्य मतं मध्वमतं श्रीमच्च तत् मध्वमतं चेति विग्रहः । तत्र श्रीमत्त्वं मते धर्मिपारतन्त्र्येण मध्वेऽप्यन्वेति । श्लोके श्रीमांश्चासौ मध्वश्च श्रीमन्मध्वः तस्य मतं तस्मिन्निति विग्रहः । तत्र श्रीमत्वं धर्मिपारतन्त्र्येण मतेऽप्यन्वेति । स्वविशेष्यविशेष्ये स्वस्यान्वयः धर्मिपारतन्त्र्येणान्वयः । लोके "हारग्रीवं पश्ये"त्यत्र हारपदार्थस्य ग्रीवायां विशेषणीभूतस्य तद्द्वारा पुरुषद्वारा च द्वितीयार्थकर्मत्वेऽन्वयः । तथा

श्रीमत्वस्य स्वविशेष्यविशेष्ये मतेऽप्यन्वयः । तथाच श्रीमान् यो मध्वः तस्य श्रीमत् यन्मतं तस्मिन्नित्यर्थो लभ्यते । तत्र श्रीमत्त्वं च मध्वे श्रीशब्दस्य वेदवाचकत्वेन प्रतिपाद्यतासम्बन्धेन वेदवत्त्वस्य लाभेन वेदप्रतिपाद्यत्वं, मते च व्यासदेवहृदयातिवल्लभत्ववासुदेवागणेयसद्गुणगणपूर्णत्वप्रतिपादकत्वनिखिलदोषवर्जितत्वभूतभाविभविष्यज्जनादूष्यत्व, अप्रमेयहृदयत्वावन्ध्यभाषणत्वनिखिललक्षणलक्षितत्वनाकिनायकमाननीयत्वमुखगुणभूषितत्वम् ।

एतेन अनीदृशगुणानामितरभाष्यकाराणामपेक्षया तेषां अत्याप्ततमत्वमेतच्छास्त्रस्य प्रमाणतमत्वं च प्रतिपादितम् । ततश्चैतन्मतप्रतिपादितान्येव प्रमेयानि प्रमाणप्रमितानि नेतराणीति सूचितम् ।

ननु एतदाचार्याणां वेदप्रतिपाद्यत्वादिगुणवत्वे प्रमाणाभावेन तच्छास्त्रस्यापि प्रामाण्यासम्भवेन नेदं युक्तमिति चेन्मैवम् । अस्मदाचार्याणां वेदप्रतिपाद्यत्वे तादृशवाय्ववतारत्वे च प्रमाणानां जागरूकत्वात्—

"जातो जायते सुदिनत्वेऽह्नां
समर्थ आ विदथे वर्धमानः ।
पुनन्ति धीरा अपसो मनीषा
देवया विप्र उदियर्ति वाचम्" ॥

[ऋग्वेदे अ. ३-१-३]

अस्यार्थः—सः हनुमद्भीमरूपेणावतीर्य भगवत्सेवाकृद्वायुः आविदथे सम्यग् ज्ञाने जायमाने अह्नां दिनानां सुदिनत्वे समीचीन-दिनत्वाय वर्धमानः मणिमत्प्रमुखदैत्यजयेन प्रवर्धमानः जायते पुनः विप्रस्सन् वाचं वेदादिशास्त्रं दुर्वादिनां अपव्याख्यान-निराकरणेन स्वव्याख्यानेन पुनर्जायमानमिव करोति । अपसः तदुपदिष्टकर्माचरणतः धीरा उत्तमाधिकारिणः पुनन्ति शुद्धाः भवन्ति । पुनः मनीषा शुद्धान्तःकरणजनिततत्वज्ञानेन देवया देवयानेन परब्रह्म प्राप्नुवन्ति इति ।

एवं " **सप्तस्वसररुषीर्वावशानो विद्वान्मध्व उज्जभाराद्दशे-कम्। अन्तर्येमे अन्तरिक्षे पुराजा इच्छन्वव्रिमविदत्पूषणस्य** "। [मं. १०-५-५]

" **प्रधारा मध्वो अग्रियो महीरपो विगाहते। हविर्हविष्षु वन्द्यः** " । [मं. ९-७ २]

मध्वो वो नाम मारुतं यजत्राः प्रयज्ञेषु शवसा मदन्ति । ये रेजयन्ति रोदसी चिदुर्वी पिन्वन्त्युत्सं यदयासुरुग्राः । [मं. ७-५७-१]

"**तृतीयमस्य वृषभस्य दोहसे दशप्रमतिं जनयन्त योषणः**"। **यदीमनुप्रदिवो मध्व आधवे गुहा सन्तं मातरिश्वा मथायति** [मं. ११-४१-२-३] इत्याद्यागमास्तत्र प्रमाणम् । एतेषामर्थस्तु—" मध्वाध्वकण्टकोद्धारयुक्तिमल्लिकादौ " द्रष्टव्यः । ग्रन्थविस्तर-भयान्नेहोच्यते ।

[1] न चैवं नारायणस्य निखिलवेदप्रतिपाद्यत्वस्याभिमतत्वा-त्सिद्धान्तविरोध इति वाच्यम्। परममुख्यवृत्त्या निखिलागम-जेगीयमानता नारायणस्याभिमता । इतरेषाममुख्यवृत्त्या तत्प्रति-पाद्यत्वमिति न सिद्धान्तविरोधः । एवं पुराणवाक्यान्यपि तत्र प्रमाणानि ।

एवं धर्मेषु नष्टेषु शास्त्रेषु च कलौ युगे ।
देवैर्विज्ञापितो विष्णुर्मातरिश्वानमादिशत् ॥

उद्धरस्व महाबाहो मम धर्मान्सनातनान् ।
इत्याज्ञप्तो भगवता कलौ वायुर्भविष्यति ॥

मध्वनाम्ना यतिरसौ सच्छास्त्राणि करिष्यति ।
गीतायाश्चोपनिषदां भाष्याणि च करिष्यति ॥

निरसिष्यति पाषण्डान्सच्छास्त्राणि महामतिः ।
स्थापयिष्यति सद्धर्मान्सच्छास्त्रं व्याकरिष्यति ॥

श्रोष्यन्ति मुनयस्सर्वे शुकाद्या देवरूपिणः ।
कलौ पाषण्डभूयिष्ठे धर्मलेशविवर्जिते ॥

वैवस्वतेऽन्तरे प्राप्ते त्वष्टाविंशे कलौ युगे ।
ये पुरा भारते युद्धे निहता राक्षसा भुवि ॥

---

[1] न चैवमिति—अत्र वायोस्तदवताराणां च निखिलवेद-प्रतिपाद्यता पूर्वमुक्ता । एवं सति नारायणस्य निखिलवेदप्रति-पाद्यत्वरूपास्मत्सिद्धान्तविरोध इति ।—आशङ्काभिप्रायः

यदा प्रवर्तयिष्यन्ति मार्गं पाषण्डगोचरम् ।
तदा सम्प्रार्थितो देवैर्भगवान्हरिरीश्वरः ॥

तत्कर्मदक्षं विनतं मातरिश्वानमादिशत् ।
वायुस्तु यतिरूपेण जनिष्यति कलौ युगे ।
स दशप्रमतिर्भूत्वा कलौ धर्मान्वदिष्यति ॥
—स्कान्दपुराणम् ।

ततः कलियुगे प्राप्ते तृतीयो मध्वनामकः ।
भूरेखादक्षिणे भागे मणिमद्वंशान्तये ॥

द्वैपायनस्य सेवार्थं बदर्यां तु कलौ युगे ।
यतिरूपधरो वायुर्भविष्यति न संशयः ॥
—श्रीमुष्णमाहात्म्यम् ।

वायोर्दिव्यानि रूपाणि पद्मत्रययुतानि च ।
त्रिकोटिमूर्तिसंयुक्तस्त्रेतायां राक्षसान्तकः ॥

हनूमानिति विख्यातो रामकार्यधुरन्धरः ।
स वायुर्भीमसेनोऽभूद्वापरान्ते कुरूद्वहः ॥

कृष्णं सम्पूजयामास हत्वा दुर्योधनादिकान् ।
द्वैपायनस्य सेवार्थं बदर्यां तु कलौ युगे ॥

वायुश्च यतिरूपेण कृत्वा दुःशास्त्रखण्डनम् ।
विडम्बयन् जनान् प्राणः प्रविवेशाशु सत्तनुम् ॥

विलम्बिवत्सरे शुद्धे माघे मकरगे रवौ ।
सप्तम्यां च रवेर्वारे सुनक्षत्रे शुभे दिने ।
द्वात्रिंशल्लक्षणैर्युक्तः तेजोमयवपुस्तदा ॥
(वायुपुराणम्)

"हनुमद्भीममध्वाख्यास्त्रयो वायोस्सुता इमे" ।
[ब्रह्माण्डपुराणे मखखण्डे अध्यायः २४]

रौप्यपीठे मध्यगेहे निर्विकारोऽप्यजायत ।
एकविंशत्कुभाष्यं च प्रदूष्यागमतर्कतः ॥ (स्कान्दे)

वृत्रं हत्वा शक्रदेवो वायुमभ्येत्य भक्तिमान् ।
इत्युवाच महापापात्कथं स्यान्निष्कृतिर्मम ॥

वायुरुवाच—
मघवन्पातकस्यालमुपायं तु ब्रवीमि ते ।
गुरूणां सेवया नित्यं महतोऽपि विनिष्कृतिः ।
त्रेतायुगे चेन्दिरायाश्शरीरे सेवनात्पुनः ।
कलौ युगे मच्छरीरे नाशः स्यात्सेवया पुनः ॥
इत्यादि ॥

अत्रेयं कथा । श्रीमदाचार्याणामवतारात्प्राक् नवमासपर्यन्तं तद्गर्भवासेन तदीयदुःखाद्यनुभूय स्थितवन्तं कञ्चन निष्कासयन् भगवान्मातरिश्वा तच्छरीरं प्रविवेशेति । तदुक्तम्—

सम्पूर्णलक्षणचणं नवराजमान-
द्वारान्तरं परमसुन्दरमन्दिरं तत् ।
राजेव सत्पुरवरं भुवनाधिराजो
निष्कासयन्परमसौ भगवान् विवेश ॥

इति। स च जीवो देवेन्द्र इति। एतन्निपुणतरं निरूपितं चतुःषष्टिकलापरिपूर्णैः चतुरधिकशतग्रन्थरत्नप्रणेतृभिः निराकृताऽद्वैतशैवैस्सर्वतन्त्रस्वतन्त्रैः श्रीमद्विजयीन्द्रतीर्थैरन्वर्थनामभाग्भिः यतिवरैः "मध्वतन्त्रमुखभूषणे"।

किञ्च श्रीमदाचार्याणां मतमेव परब्रह्माभिमतं सन्मतमिति ज्यौतिषशास्त्रमपि वर्णयति। लोके—"प्रत्यक्षं ज्यौतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणा"विति सुस्पष्टम्। नाडीग्रन्थेषु तावत्तत्र तत्र भविष्यकथनं जागर्ति। तत्र चतुर्मुखनाड्यां देवताप्रकरणे दरीदृश्यते।

हन्त कालस्य कौटिल्यं कलौ किं किं भविष्यति।
अद्वैतव्याकुले लोके मध्वाख्यो ब्राह्मणोत्तमः।
विष्णुभक्त्यादिसम्पूर्णः द्वैतशास्त्रप्रवर्तकः।
सर्वोत्तमत्वं श्रीविष्णोः स्थापयिष्यति सर्वशः।
योगिवर्यस्स मध्वाख्यो गुरुस्सत्यस्य[1] कारकः।

[1] सत्यमिति मीमांसा इति तलवकारभाष्यम्। अत्र ब्रह्ममीमांसाभाष्यं ग्राह्यमिति भाति।

गुरोरनुग्रहादेव द्वैतशास्त्रं करिष्यति।
शाङ्करांस्तत्र तत्रायं खण्डयिष्यति युक्तिभिः।
मध्वनिन्दाप्रवक्तारो दुर्भगा नात्र संशयः।
पारिजाताख्ययोगोऽयं लग्नाधिपतिदर्शितः।
मध्वनिन्दाप्रवक्तारः परजाता न संशयः।
दिवि वा भुवि वा यत्र कुत्रापि निवसन्तु ते।
परजाता रहःपापा भुवि प्रेत्य निराशिषः।
निरयं यान्ति शनिना दृष्टास्ते मध्वनिन्दकाः।
निरीश्वरं जगत्प्रोक्तमद्वैतब्रह्मवादिभिः।
अद्वैतचोरान्संहृत्य जगत्तस्मै समर्पितम्।
विष्णवे मध्वयतिना तस्माद्विष्णुपदाश्रितः।
विष्णुस्तुष्टश्च मध्वाय जगत्स्वाम्यसमर्पणात्।
कलिकाले शनेर्वीर्यान्नानादेशेषु दीक्षिताः।
शास्त्रिणस्सम्भविष्यन्ति पुराणानां प्रकल्पकाः।
पुराणे कल्पिते क्वापि मध्वनिन्दा भविष्यति।
निन्दका निरयं यान्ति यावचन्द्रदिवाकरौ।
रामाभिषेकविघ्नेन मन्थरा निरये यथा।
तथा निरयगास्सर्वे मध्वतच्छास्त्रनिन्दकाः।
तेषां च जातके नूनं षष्ट्यंशादिबलाबलम्।
विवेचयेत्तदा तत्र दुर्भगत्वं स्फुटीभवेत्।

नानानाडीशास्त्रतत्वनिर्णयेऽत्र चतुर्मुखे।
सत्यं प्रोक्तं फलं प्रोक्तं पूर्वकर्मार्जितं भुवि॥ इति।

तस्मान्नाडीप्रोक्तदिशा सिद्धं मध्वशास्त्रस्य जगन्मान्यत्वम्।

एवं च श्रीमदाचार्यकृतत्वेनास्य शास्त्रस्य प्रामाण्यम्। अस्य प्रामाण्यं हि आप्तिमूलतया श्रुतिमूलतया युक्तिमूलतया च। पूर्वोक्तप्रमाणैर्विवक्षितार्थतत्वज्ञानं, तत्वज्ञानोद्देशेन अवतारवत्त्वात् अविप्रलिप्सा। वाय्ववतारत्वेन करणपाटवादिकं च प्रतिपादितम्। ततश्च वक्त्रानुकूल्यं सतामेवोपदेशयोग्यत्वाभिधानेन श्रोत्रानुकूल्यं देवानां प्रार्थनयेत्यनेन प्रसङ्गानुकूल्यं चोक्तं भवति। ततश्च वक्त्राद्यनुकूल्येनास्याप्तिमूलत्वं प्रतिपादितं भवति। अखिलागमाभिमतार्थस्य श्रीमन्नारायणगुणपूर्णत्वादिप्रमेयस्य प्रतिपादितत्वाच्छ्रुतिमूलत्वं [युक्त्याभासादिविधुर] युक्तियुक्तार्थसाधकत्वेन युक्तिमूलत्वं च। एतच्चोत्तरत्र दर्शयिष्यते। ततश्चास्याप्त्यादिमूलकत्वेन प्रमाणतमत्वमुक्तं भवति। तदुक्तं—आप्तिमूलतयेति (अनु.)। एतद्विस्तरेण प्रकटीकृतं "**नव्यदुरुक्तिशिक्षायां श्रीमद्वादीन्द्रपूज्यचरणैः**"। एवं च परमाप्तसर्वज्ञाचार्यप्रणीतत्वेनोक्तप्रयोजकवत्तया प्रमाणतमेदंशास्त्रे प्रतिपादितान्येव तत्त्वानि प्रमाणप्रमितानीति सुष्ठूक्तम्।

तत्र हरेः परतरत्वं प्रथमं प्रमेयम्। तच्च प्रमाणप्रमितं, तथाहि—नित्यनिर्दोषतया सकलशिष्टैः स्वीकृतप्रमाणभावेषु निगमेषु

"सदेव सोम्येदमग्र आसीत्[1]" "ब्रह्म वा इदमग्र आसीत्" "आत्मा वा इदमेक एवाग्र आसीत्" [ऐ. खं. १, मन्त्रः १] इत्यादिजगत्कारणवस्तुप्रतिपादनपराणि वाक्यान्युपलभ्यन्ते। तथा—यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयंत्यभिसंविशन्ति, तद्विजिज्ञासस्व तद्ब्रह्मेति, आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः, [तैत्तिरीयोपनिषत् ब्रह्मवल्ली] "ब्रह्मविदाप्नोति परं", "तरति शोकमात्मवित्" [छां. अ. ७, मं. ३] "तमेवं विद्वानमृत इह भवति, नान्यः पन्था अयनाय विद्यते" एवमादीनि जिज्ञासाविधायकानि, तज्ज्ञानस्य मोक्षजनकत्वस्य तदितरज्ञानस्य तदभावस्य च प्रतिपादकानि च श्रूयन्ते।

तत्र—"सर्वे वेदा यत्पदमामनन्ति, तपांसि सर्वाणि च यद्वदन्ति" इति श्रुत्या सर्ववेदान्तप्रत्ययनयेन च सर्ववाक्यानामेकवस्तुविषयकत्वस्यावश्यकत्वेन 'एको ह वै नारायण आसीन्न ब्रह्मा नेशानः', "नारायणो वा इदमग्र आसीत्" इत्यादिश्रुतीनां नारायणविषयत्वस्यैव न्याय्यत्वात्, नारायण एव जगत्कारणत्वाद्यनितरसाधारणधर्मवानिति स एव सर्वोत्तम इत्यवसीयते।

ननु नेदं विचाररमणीयम्। मुमुक्षुज्ञेयं परतत्वं कैलासवासिगिरिजाजानिरुद्ररूपमेव। न तु नारायणाभिधम्। 'सदेव

[1] छां. अ. ६, खं. २.

सोम्येदमग्र आसीत्’ ‘ब्रह्म वा इदमग्र आसीत्’ ‘यतो वा इमानि भूतानि जायन्ते’, “आत्मा वारे द्रष्टव्य” इत्यादि छान्दोग्यतैत्तिरीयवाजसनेयादिस्थकारणवाक्यघटकसद्ब्रह्मादिपद - प्रतिपाद्यं—“सोऽकामयत, बहु स्यां प्रजायेयेति” “तदैक्षत बहु स्यां प्रजायेये”तीत्युत्तरवाक्यपर्यालोचनया चेतनत्वेनावगम्यते। तच्च रुद्ररूपमेव। श्वेताश्वतरोपनिषदि जगत्कारणं किं ब्रह्म किं-देवतारूपमित्यर्थकेन “किं कारणं ब्रह्म कुतःस्म जाताः” [श्वेताश्वत-रोपनिषत्प्रारम्भः] इत्यादिवाक्येन उदाहृतवाक्यपर्यालोचनया सदादिशब्दितं किञ्चिज्जगज्जन्मादिकारणमस्तीत्येतावत्सामान्यतो निश्चिन्वतां तत् किंदेवतारूपमिति संशयं प्रदर्श्य, तन्निरासायोत्तरत्र —‘संयुक्तमेतत् क्षरमक्षरं च व्यक्ताव्यक्तं भव(र)ते विश्वमीशः। अनीशश्चात्मा बुध्यते भोक्तृभोगान् ज्ञात्वा देवं मुच्यते सर्वपाशैः। [श्वेताश्व. उप. अ. १, मं. ८] इति शिवसाधारणेशाभिधानश्रुत्या यदा तमस्तं न दिवा न रात्रिर्न सन्न चासन् शिव एव केवलः। तदक्षरं तत्सवितुर्वरेण्यं प्रज्ञा च तस्मात्प्रसृता पुराणीति [श्वेताश्व. उप. अ. ४, मं. १८] तमुपक्रम्य प्रयुक्तमन्त्रेण च शिवापरनामकं रुद्ररूपमेव निखिलकारणवाक्यानां विषय इति ज्ञायते। ततश्च सदादिशब्दानां विशेषे पर्यवसाने रुद्र एव तानि पर्यवस्यन्ति।

नच ‘एको ह वै नारायण आसीदिति’ महावाक्येन[1] नारायणस्य कारणत्वप्रतिपादकेन विरोध इति वाच्यम्। तस्य

[1] महानारायणोपनिषद्वाक्येन इति भाव्यम् इति भाति।

‘ह वै’ शब्दघटितत्वेनानुवादकतया स्वयमर्थविशेषोपस्थापना-समर्थत्वात्। किंच मोक्षसाधनीभूतज्ञानविषयस्यैव परतत्वरूपत्वेन —“ततः परं ब्रह्मपदं बृहन्तं यथानिकायं सर्वभूतेषु गूढम्। विश्वस्यैकं परिवेष्टितारमीशं तं ज्ञात्वा ह्यमृता भवन्ति। वेदाहमेतं पुरुषं महान्तं आदित्यवर्णं तमसः परस्तात्, तमेवं विदित्वाऽति-मृत्युमेति, नान्यः पन्था विद्यतेऽयनाये”ति [श्वेताश्व. उप. अ. ३, मन्त्र ७, ८] श्वेताश्वतरोपनिषदि अन्यज्ञानस्य मोक्षोप-योगिताप्रतिषेधेनेश्वरज्ञानस्यैव तत्साधनत्वावगतेः ईश्वर एव परतत्वं भवितुमर्हति। न च नारायणैकपरेण “तमेवं विद्वानमृत इह भवति, नान्यः पन्था अयनाय विद्यत” इत्यन्यज्ञानस्य मोक्ष-प्रयोजकतां प्रतिषिध्य नारायणप्रज्ञाया एव तत्कारणताबोधकेन पुरुषसूक्तेन विरोध इति वाच्यम्। पुरुषसूक्तस्य नारायणैकपरत्व-स्यैवाप्रामाणिकत्वात्। किञ्चेश्वरमात्रसाधारण “उतामृतत्व-स्येशान” इति ईशानश्रुत्या पुरुषसूक्तस्येश्वरपरत्वस्यैव न्याय्य-त्वात्। न च “ह्रीश्च ते लक्ष्मीश्च पत्न्या”विति लक्ष्मीपतित्व-रूपलिंगविरोध इति वाच्यम्। श्रुतितो लिङ्गस्य दौर्बल्यात्।

न च पुरुषो ह वै नारायणोऽकामयत प्रजास्सृजेयेति। नारायणाद्ब्रह्मा जायते, नारायणाद्रुद्रो जायते [नारायणाथर्वशिरो-पनिषत्प्रारम्भः] इति नारायणोपनिषदन्तर्गतवाक्येन सर्वभूतो-त्पत्तिनिदानहिरण्यगर्भोत्पत्त्यनन्तरं रुद्रोत्पत्तेः श्रवणेन रुद्रस्य कार्य-कोटिप्रविष्टतया तस्य न कारणत्वं सम्भवदुक्तिकमिति वाच्यम्।

"देवा ह वै स्वर्गं लोकमायन्" इत्याद्यथर्वशिरसि [अथर्वशिरउपनिषत्प्रारम्भः] रुद्रस्य सर्गाद्यकालीनत्वावगमेन तदितरेषां तथात्वानवगतेश्च, नारायणोपनिषदि नारायणकार्यत्वेनावगतरुद्रात् उक्तसर्वकारणत्वेनावगतरुद्रस्यान्यत्वे बाधकाभावात् । इत्थं च शिवेतरस्य सर्गाद्यकालीनवृत्तितां प्रतिषिध्य शिवस्य तत्त्वं प्रतिपादयत् शिव एव केवल इति एवकारघटितं श्वेताश्वतरवाक्यमुपपन्नं भवति । अन्यथा केवलशब्दानुपपत्तेः । एवं रुद्रस्य सर्वजगत्कारणत्वाभावे तैत्तिरीये—"यो देवानां प्रथमं पुरस्ताद्विश्वाधिको यो रुद्रो महर्षिः । हिरण्यगर्भं पश्यत जायमानम्" [महानारायणोपनिषत्–अनु. १२] इति सकलजगन्निदानहिरण्यगर्भस्य तस्मादुत्पत्तिप्रतिपादनानुपपत्तेः । न चायं नारायणाद्रुद्रोत्पत्तिप्रतिपादक "नारायणाद्रुद्रो जायते" इति वाक्यार्थानुवाद इति वाच्यम् । रुद्रनारायणशब्दयोः पर्यायत्वाभावेन तद्वाक्यात्प्राप्तेरभावेनानुवादायोगात् । ततश्च जगत्कारणत्वेन सर्वाधिष्ठातृत्वेन च मोक्षप्रदत्वेन च निखिलनिगमजेगीयमानः शिव एव सद्ब्रह्मादिशब्दितमुमुक्षुज्ञेयं परतत्वमिति कथं नारायणशब्दपर्यायहरिशब्दवाच्यस्य परतरत्वम् । तदुक्तम्—

अकण्ठेकलङ्कादनङ्गेभुजङ्गा-
दवामेकलत्रादफालेऽनलाक्षात् ।
अपाणौकपालादमौलौशशाङ्का-
दहं देवमन्यं न मन्ये न मन्ये ॥ इति, इति चेत्

अत्र ब्रूमः—

"वन्दिताशेषवन्द्योरुवृन्दारकं,
इन्दिराचञ्चलापाङ्गनीराजितं",

नारायणरूपमेव निखिलमुमुक्षुजननिचयोपास्यमानं परतत्वं नान्यत् । तथाहि—'एको ह वै नारायण आसीन्न ब्रह्मा नेशानः नेमे द्यावापृथिवी न नक्षत्राणि नापो नाग्नीषोमौ न सूर्यः स एकाकी न रमते तस्य ध्यानान्तस्थस्यैका कन्या दशेन्द्रियाणि' इत्यादिना "अथ पुनरेव नारायणः सोऽन्यं कामं मनसा ध्यायीत तस्य ध्यानान्तस्थस्य ललाटात्स्वेदोऽपतत् इमा आपस्तद्धिरण्मयमण्डमभवत् तत्र ब्रह्मा चतुर्मुखोऽजायत । अथ पुनरेव नारायणः सोऽन्यं कामं मनसा ध्यायीत तस्य ध्यानान्तस्थस्य ललाटात्स्वेदोऽपतत् तत्स्वेदात् बुद्बुदमभवत् बुद्बुदात् त्र्यक्षः शूलपाणिः पुरुषोऽजायत" [महोपनिषत् प्रथमाध्यायः] इत्यनेन महोपनिषद्वचनजातेन, एवं "अथ पुरुषो ह वै नारायणोऽकामयत, प्रजास्सृजेयेति अथापस्ससर्ज" नारायणाद्ब्रह्मा जायते, नारायणाद्रुद्रो जायते, नारायणात्प्रजापतिः प्रजायते, नारायणादिन्द्रो जायते, नारायणाद्द्वादशादित्याः, रुद्रा वसवस्सर्वे देवास्समुत्पद्यन्ते सर्वे लोकास्सर्वाणि च भूतानि नारायणादेव समुत्पद्यन्ते, नारायणे प्रलीयन्ते [नारायणाथर्वशिरउपनिषत्] इति नारायणोपनिषद्वचनेन च सर्गाद्यकाले चतुर्मुखशिवादिसत्त्वाभावविशिष्टतया, नारायणस्यैव सत्वावेदनेनैव निखिलजगन्निदानप्रजापतिरुद्रादि-

कारणत्वावेदनेन च तस्यैव निखिलजगत्कारणत्वावधारणात् । न तत्काले सत्वशून्यब्रह्मरुद्रयोः तत्कालसत्त्वविशिष्टनारायणसमतया निखिलजगन्निदानत्वमुपपद्यते । यथा ब्रह्मेशानयोः सर्गाद्यसमये सत्त्वनिषेधकवाक्यं तथा न तत्तुल्यतया नारायणस्य तत्कालसत्त्वनिषेधिका वागुपलभ्यते । तेन ब्रह्मेशाननारायणानां कल्पभेदेन जगत्कारणत्वमिति व्यवस्था न संघटते ।

न च "नान्यः कश्चिन्मत्तो व्यतिरिक्तः, एको रुद्रो न द्वितीयोऽवतस्थे" "शिव एव केवलः" इत्याद्यथर्वशिरःश्वेताश्वतरोपनिषद्वाक्येन शिवमात्रस्य तत्काले सत्त्वावेदकेन विरोध इति वाच्यम् । तेषां वाक्यानां—"नासदासीन्नो सदासी"दितिवत् विशेषाकारेण निषेध्यवस्तुविषयतयाऽविरोधात् । अन्यथा—"आनीदवातं, तम आसीत्" इति वाक्यशेषप्रतिपन्नब्रह्मतमसोरपि नासदासीदित्यादिनिषेधविषयत्वापत्तेः ।

न चाथर्वशिरसि "देवा ह वै स्वर्गं लोकमगमन् ते देवा रुद्रमपृच्छन् को भवानिति । सोऽब्रवीत् अहमेक एव प्रथममासं वर्तामि च भविष्यामि चे"ति [अथर्वशिरउप. आरम्भः] वाक्येन रुद्रस्यापि नारायणवत् सर्गाद्यकालीनत्वावगमेन तस्य नेशानेत्युदाहृतश्रुतिवाक्येन निषेधे — "अतिरात्रे षोडशिनं गृह्णाति, नातिरात्रे षोडशिनं गृह्णाती"तिवाक्यविहितषोडशिग्रहणवत् विकल्पप्रसक्तेः, कल्पभेदेन सत्त्वासत्त्वयोरुपपादनीयतया यत्कल्पे सर्गाद्यसमयवृत्तित्वमीशानस्य तत्कल्पीयसृष्टावीशानस्य

जगत्कारणत्वस्य वाच्यतया नारायणवदीशानस्यापि जगत्कारणता युक्तियुक्तैवेति वाच्यम् ।

अथर्वशिरोगतरुद्रशब्दस्य तदन्तर्यामिपरतया लक्षणया वा—

रुजं द्रावयते यस्माद्रुद्रस्तस्माज्जनार्दनः ।
ईशनादेव चेशानो महादेवो महत्त्वतः ।
पिबन्ति ये नरा नाकं मुक्तास्संसारसागरात् ।
तदाधारो यतो विष्णुः पिनाकीति ततः स्मृतः ।
शिवस्सुखात्मकत्वेन शर्वश्शंरोधनाद्धरिः" ।

इत्यादिब्रह्माण्डपुराणान्तर्गतवचनेन च परममुख्यवृत्त्या वा ब्रह्मेशानादिसमस्तप्रपञ्चकारणनारायणपरत्वेनोपपत्तौ अष्टदोषदुष्टविकल्पस्यानाश्रयणात् ।

न च नारायणजन्यत्वेनोदाहृतश्रुतिसिद्धो रुद्रः मूर्तित्रयान्तर्गतः सगुण एव । शिव एव केवलः इत्युदाहृतागमप्रतिपाद्यश्च परशिवोऽन्य एव, स च जगत्कारणमिति वाच्यम् । नेशान इत्यनन्यसाधारणशब्देन ईशानसामान्यनिषेधात् । न च एको ह वै नारायण आसीदिति वाक्यस्यानुवादकता । प्रमाणान्तराप्राप्तार्थवत्तया ह वै शब्दघटितस्यापि तस्य वाक्यस्याननुवादकत्वोपपत्तेः । किञ्च श्वेताश्वतरोपनिषदः तदुपनिषदुपात्तेशादिशब्दबलेन नारायणान्यप्रसिद्धेशविषयत्वाङ्गीकारे—तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतम् । पतिं पतीनां परमं परस्तात् विदाम देवं भुवनेशमीड्यम् । न तस्य कार्यं करणं च विद्यते, न तत्समश्चाभ्यधिकश्च

*

दृश्यते । परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च । न तस्य कश्चित्पतिरस्ति लोके न चेशिता नैव च तस्य लिङ्गम् । स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः [श्वेताश्व अ. ६, मं. ७, ८, ९] इति वाक्ये तमीश्वराणां परमं महेश्वरं इति योगरूढमहेश्वरपदादेव निरवधिकैश्वर्यविशिष्टरुद्र एव बोध्यते, नान्य इति इतरव्यावृत्तिसिद्धेः परममिति विशेषणं व्यर्थम् । न हि महेश्वरापेक्षयाऽधिकाभावे परमेतिविशेषणं सार्थकं भवति । न चेयं स्तुतिपरा नानुवादिकेतिवाच्यम् । वस्तुतत्व-प्रतिपादनप्रस्तावात्तस्य स्तुतिपरत्वानुपपत्तेः ।

एवं घटं प्रति दण्डचक्रयोरिव पद्मयोनिं प्रति युगपत्कल्प-भेदेन वा जनकत्वे अत्रत्यस्य "न तत्समश्चाभ्यधिकश्च दृश्यत" इति रुद्रतुल्यपुरुषान्तरनिषेधकवाक्यस्यानुपपत्तेः । तदानीं तत्तुल्यनारायणस्यैव सत्त्वात् ।

किञ्च नारायणस्येव रुद्रस्य हिरण्यगर्भजनकत्वं नोपपद्यते । सामवेदे प्रपदनामकमन्त्रे "विरुपाक्षाय दण्डं जये ब्रह्मणः पुत्राय नमः" । शतपथब्राह्मणे "संवत्सरे कुमारोऽजायत । तं प्रजापति-रब्रवीत्, कुमार! किं करोषि यच्छ्रमात्तयोधिजातोऽसि" इत्यादिवाक्यानि श्रूयन्ते । तैश्च रुद्रस्य ब्रह्मपुत्रत्वम्, तद्दत्त "रुद्र-भवशिवेशानपशुपतिभीमोग्रमहादेव" रूपनामाष्टकवत्त्वं च श्रूयते । ततः तद्विरोधापत्तेः । "सहस्रशीर्षा पुरुषः, पुरुष एवेदं सर्वम्"

इति पुरुषसूक्तस्थमन्त्राम्नानात् श्वेताश्वतरोपनिषदः नारायणपरत्व-मेवावसीयते । नो चेन्नारायणपरपुरुषसूक्तस्थमन्त्राम्नानानुपपत्तेश्च । किञ्च विष्णवसाधारणलिङ्गभूतसत्त्वगुणप्रवर्तकत्वस्य "महान्प्रभुर्वै पुरुषः सत्त्वस्यैष प्रवर्तकः" इति प्रतिपादनात्तदुपपत्तेश्च । न हि नारायणादन्यस्य सत्त्वगुणप्रवर्तकत्वं सम्भवति । न च पुरुषसूक्तस्य नारायणमात्रपरत्वे प्रमाणाभावः ।

"यथा हि पौरुषं सूक्तं विष्णोरेवाभिधायकम् ।
न तथा सर्ववेदाश्च वेदाङ्गानि च नारद" ॥

इति बृहत्संहितावचनेन,

"यथाहि पौरुषं सूक्तं नित्यं विष्णुपरायणम् ।
तथैव मे मनो नित्यं भूयाद्विष्णुपरायणम्" ॥

इति ब्राह्मवचनादिना च तस्य सूक्तस्य विष्णुमात्रविषयत्वाध्यव-सायात् ।

एवं विष्णोरेव सत्त्वगुणप्रवर्तकत्वं प्रमाणप्रमितम् । तथाहि—वाराहे अगस्त्यवराहसंवादे—

यत्सत्वं स हरिर्देवो यो हरिस्तत्परं पदम् ।
सत्वं रजस्तम इति त्रितयं चैतदुच्यते ।
सत्वेन मुच्यते जन्तुः सत्वं नारायणात्मकम् ।
रजसा सत्वयुक्तेन भवेत्सृष्टी रजोऽधिका ।
तच्च पैतामहं वृत्तं सर्वशास्त्रेषु पठ्यते ।
यद्वेदबाह्यं कर्म स्यान्मामुद्दिश्योपसेव्यते ।

तद्रौद्रमिति विख्यातं तन्नेष्टं गदितं नृणाम् ।
यद्वा न रजसा कर्म केवलं तामसं तु यत् ।
तद्दुर्गतिपरं नृणां इह लोके परत्र चेति ।

[वाराह अध्या. ७१,१७तः २२ श्लो.] रुद्रेणैव सत्त्वगुणात्मकत्वाभिधानात् । अव्यक्तादभवत्स्थाणुरिति अव्यक्तादुत्पन्नस्य परमकारणत्वानुपपत्तेश्च ।

"हरिं हरन्तमनुयन्ति देवाः, विश्वस्येशानमृषभं मतीनाम्" इति तैत्तिरीयश्रुत्या रुद्रस्य हरिशब्दाभिधेयनारायणनाश्यत्वावगमात् ।

नच "हरिं हरन्तं विश्वस्येशान"मिति योजनया हरेरेव रुद्रनाश्यत्वावगतेर्वैपरीत्यं किं न स्यादिति वाच्यम् ।

ब्रह्माणमिन्द्रं रुद्रं च यमं वरुणमेव च ।
निगृह्य हरते यस्मात्तस्माद्धरिरिहोच्यते ।

इति भारतवचनेन रुद्रादिनाशकत्वस्यैव हरिशब्दप्रवृत्तिनिमित्ततयावगतेस्तद्विरोधापत्तेर्वैपरीत्यायोगात् ।

नन्वेवंसति परात्परो ब्रह्मा तत्परात्परो हरिः तत्परात्परतो हीश इति शिवशब्दवाच्ये नारायणात्परतरत्वावेदकशिवसंकल्पोपनिषद्वाक्यविरोधापत्तेः, अत एव नारायणपरं ब्रह्मेत्यत्र नारायणात्परमिति पञ्चमीतत्पुरुष एवाश्रयणीय इति चेन्मैवम् । शब्दक्रमापेक्षया अर्थक्रमस्य ज्यायस्त्वेन उदाहृतमहोपनिषन्नारायणोपनिषदाद्यनुरोधेन नारायणस्य सर्गाद्यसमये

हिरण्यगर्भमहादेवादिजनकत्वेन प्राधान्यात् । तत्परात्परतो हीशः, तत्परात्परो ब्रह्मा, तत्परात्परो हरिरितिक्रमस्यैवानुसरणीयत्वात् विरोधानवकाशात् । अत एव उक्तवाक्यानुरोधेन नारायणपरं ब्रह्मेत्यत्र पञ्चमीतत्पुरुषाश्रयणमपि न युज्यते । प्रागुक्तन्यायेन कर्मधारयस्यैवाश्रयणीयत्वात् । नो चेदत्रैवोत्तरत्र "तस्याश्शिखाया मध्ये परमात्मा व्यवस्थित" इति प्रागुपस्थितनारायणस्य "उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृत" इति स्मृत्या नारायण एव प्रसिद्धपरमात्मत्वोक्तिरसङ्गता स्यात् । किं च "यो देवानां नामधा एक एवे"ति सावधारणश्रुत्या सकलदेवनाम्नां एक एव मुख्यार्थोऽङ्गीकार्यः । स च "ब्रह्मैव वाचः परमं व्योमे"ति श्रुतेः ब्रह्मरूप एव स्वीकार्यः । ब्रह्मशब्दश्च "अथ कस्मादुच्यते ब्रह्मेति बृहन्तो ह्यस्मिन्गुणा" इति श्रुत्या गुणपूर्णाभिधायी । गुणपूर्णश्च नारायण एव । अराः न भवन्तीति नाराः इति व्युत्पत्त्या दोषविरुद्धा गुणाः नारपदार्थाः, तेषामयनं[1] इति विग्रहेण नारायणशब्दोऽपि गुणपूर्णवाची । ततश्च ब्रह्मशब्दैकार्थकनारायणपदबोध्यमेव ब्रह्मशब्दवाच्यं भवति ।

किञ्च मुख्यामुख्ययोर्मध्ये मुख्यार्थ एवाङ्गीकार्यः । सति बाधकेऽमुख्यार्थः । "गङ्गायां मीन" इत्यत्र मुख्यार्थबाधाभावेन प्रवाहरूप एव मुख्यार्थः स्वीक्रियते, "गंगायां घोष" इत्यत्र

[1] ल्युटष्टित्करणाज्ज्ञापकात् अयनशब्दः त्रिलिंग इति महान्तोऽभिप्रयन्ति ।

मुख्यार्थप्रवाहे समभिव्याहृतघोषपदार्थान्वयबाधेन तीररूपोऽमुख्यार्थ उररीक्रियते । एवं च 'तदेव ब्रह्म परमं कवीना''मिति श्रुतेः ब्रह्मशब्दश्च विष्णावेव मुख्यः ।

न च तदेवेत्यत्र तच्छब्देन विष्णोः परामर्शे सावधारणब्रह्मशब्देन तत्र मुख्यवृत्तिः सिध्येत् । तदेव नेति वाच्यम् ।

''अम्भस्यपारे भुवनस्य मध्ये नाकस्य पृष्ठे महतो महीयानि''त्युपक्रम्य 'तदेवे'ति वाक्यं पठितं वर्तते । अम्भस्यपार इति मन्त्रः नारायणपर एव नारायणशब्दसमानार्थत्वात् ।

नारायणशब्दो हि—

आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः ॥

इति स्मृत्या (मनुस्मृतिः अ. १ श्लो. १०) समुद्रशायिविष्णुवाची । अम्भस्यपारेत्युक्तमन्त्रोऽप्युक्तसमानार्थक एवेति विष्णुपर इति ज्ञायते । ततश्चोपक्रमवाक्योपस्थितविष्णुपरित्यागे नियामकाभावेन तदेव ब्रह्मेत्यत्र तच्छब्दो विष्णुपरामर्शक एवेति स एव ब्रह्मशब्दमुख्यवाच्यः ।

'यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधा'' मिति स्वेच्छामात्रेण ब्रह्मरुद्रादिपददातृत्वेन प्रतीयमानाया अम्भ्रणीपदवाच्यायाः श्रियोऽपि कारणत्वेनेरितसमुद्रशायिवस्तुप्रतिपादक ''मम योनिरप्स्वन्तः समुद्र' इति वाक्यसमानार्थकां-

म्भस्यपारेतिमन्त्रोऽपि तादृशश्रियः कारणीभूतवस्तुपर एव । श्रीकारणं च भगवान् श्रीजानिर्नारायण एवेति प्रसिद्धेः , अम्भस्यपारेति मन्त्रो नारायणपर एवेति तदुपक्रम्य पठिततदेवेति वाक्यघटकतच्छब्दपरामृष्टोऽपि स एव ।

एवं ''यस्मिन्निदं सं च विचैधि(ति) सर्वं यस्मिन्देवा अधि विश्वे निषेदुः'' इति सर्वदेवाश्रयत्वेन कंचन प्रतिपाद्य तदेव ब्रह्मेत्युक्तम् । सर्वदेवाश्रयत्वं च ''सप्तार्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठन्ति प्रदिशा विधर्मणी''ति वाक्यान्तरेण विष्णोरेव प्रमीयते । ततश्च सर्वदेवाश्रयत्वेन प्रमितविष्णुपर एव यस्मिन्नित्यादिमन्त्र इति तदेवेत्यत्र तच्छब्दो विष्णुपरामर्शक एव । एवं यमन्तस्समुद्रे कवयो वयन्ति इति वाक्यचोदितपुरुषः तदेवेत्यनेन प्रमितविष्णुरेवेति स एव ब्रह्मशब्दमुख्यार्थः इत्यवसीयते ।

एवं ''यदक्षरे परमे प्रजा'' इति अक्षरनाम उक्त्वा तदेवेति वाक्यं पठितम् । अक्षरशब्दवाच्यश्च नारायण एव । ''ऋचो अक्षरे परमे व्योम''न्निति वामनसूक्ते अक्षरनाम्नः विष्णावेव प्रयोगात् । यतः प्रसूता जगतः प्रसूतीति जगत्प्रसवकारणप्रकृतिनिदानत्वस्य एतस्य पुरुषस्योक्त्या तदेवेत्युक्तम् । तादृशप्रकृतिकारणत्वं च मम योनिरिति वाक्येन विष्णावेव प्रमितमिति स एव तत्पदवाच्य इति ब्रह्मशब्दो मुख्यवृत्त्या विष्णुवाचक इति । तदुक्तं—

" दोषारब्छिद्रशब्दानां पर्यायत्वं यतस्ततः ।
गुणा नारा इति प्रोक्तास्तद्वान्नारायणः स्मृतः ।

ब्रह्मशब्दोऽपि हि गुणपूर्तिमेव वदत्ययम् ।
अतो नारायणस्यैव जिज्ञासात्र विधीयते" ।

सिद्धत्वाद्ब्रह्मशब्दस्य विष्णौ स्पष्टतया श्रुतौ ।
अम्भस्यपार इत्युक्तो नारायणपदोदितः ।
आपो नारा इति ह्याह स एवाप्स्वन्तरीरितः ।
कामतो विधिरुद्रादिपददात्र्या स्वयं श्रिया ।
योनित्वेनात्मनो विष्णोस्तिष्ठन्तीत्युदितस्य च ।
यस्मिन्देवा अधीत्युक्त्वा समुद्रं स्थानमेव च ।
नाम चाक्षरमित्येव ऋच इत्युदितं तु यत् ।
यतः प्रसूतेत्युक्त्वा च तदेव ब्रह्म चाब्रवीत् ।

[अनुव्याख्या-जिज्ञासा-८३ तः ८८ श्लोकाः] इति । एतदभिप्रायेणोक्तं भाष्ये—"ब्रह्मशब्दश्च विष्णावेवे"ति । ततश्चात्र मुख्यार्थाङ्गीकारे निर्बाधात् ब्रह्मशब्दमुख्यार्थो विष्णुरेव निखिलनिगमनिकरजेगीयमान एक एवेत्यवश्यमभ्युपेयमिति ।

तथा—नामानि[1] विश्वाभि न सन्ति लोके यदाविरासीदनृतस्य सर्वे "नामानि सर्वाणि यमाविशन्ति ।

---

[1] अनृतस्य विष्णिवतरस्य इति तत्त्वप्रकाशिका । अनृतस्येत्यस्य तदेवर्तमितिश्रुत्या ऋतपदवाच्यविष्णुभिन्नस्येत्यभिप्रेत्य विष्णिवतरस्येत्यर्थ उक्तः इति भावदीपः ।

तं वै विष्णुं परममुदाहरन्ति,
वचसां वाच्यमुत्तमं,
वेदाक्षराणि यावन्ति पठितानि द्विजातिभिः ।
तावन्ति हरिनामानि कीर्तितानि न संशयः ।
अहं विजानामि विविक्तरूपो
न चास्ति वेत्ता मम चित्सदाहम् ।
वेदैरनेकैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम् ।
नारायणपरा वेदाः
नतास्स्म सर्ववचसां प्रतिष्ठा यत्र शाश्वती ।
वेदे रामायणे चैव भारते भरतर्षभ ।
आदौ मध्ये तथा चान्ते विष्णुस्सर्वत्र गीयते ।
नमो भगवते तस्मै व्यासायामितचेतसे ।
यस्य प्रसादाद्वक्ष्यामि नारायणकथामिमाम् ।

इति श्रुतिस्मृतिवैशंपायनवचनैर्नारायणस्यैव सकलवेदमहातात्पर्यगोचरत्वावगतेः । तथाच तदुपनिषदन्तर्गतशिवादिनाम्नां परममुख्यवृत्त्या वाच्यो नारायण एवेति स एव तादृशोपनिषत्प्रतिपाद्यः । अतो रुद्रादिकारणत्वं नारायणस्यैवेति स एव निखिलजगत्कारणं परतत्वमित्यवश्यमभ्युपेयमिति ।

ननु नारायणशब्दस्य विष्णौ रूढिसत्वे प्रमाणाभावेन योगमात्रस्यार्थविशेषानिश्चायकत्वेन पूर्वोक्तवाक्यानां नारायणपरत्वेऽपि न विष्णुविषयकत्वनिश्चय इति चेन्न ।

शक्तिग्राहकप्रमाणानि—

शक्तिग्रहं व्याकरणोपमान-
कोशाप्तवाक्याद्व्यवहारतश्च ।
वाक्यस्य शेषाद्विवृतेर्वदन्ति
सान्निध्यतस्सिद्धपदस्य वृद्धाः ॥

इति प्राचैस्संगृहीतानि । तत्र—" विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवाः " इति कोशपर्यालोचनया नारायणशब्दो विष्णौ रूढ इति ज्ञायते । नच नारायणशब्दस्य विष्णौ रूढत्वेऽपि तत्र यौगिकत्वे प्रमाणाभाव इति वाच्यम् ।

आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः ।

इति मन्वादिस्मृतेः ।

आपो हि नरशब्दार्था नरा विष्णोः समुद्भवाः ।
अयनं तास्तदस्यासीत्तेन नारायणः स्मृतः ।
नरो हि भगवान् विष्णुः तज्जास्तद्योगिनोऽपि वा ।
नारास्तदयनं व्याप्य तेन नारायणः स्मृतः ।
अथवा नेतृभूतोऽयं नरो नारं चराचरम् ।
वासस्थानमिदं सर्वं तेन नारायणः स्मृतः ।
ज्ञानशक्त्यादयो यस्य गुणा नारा इति स्मृताः ।
षाड्गुण्यपरिपूर्णोऽयं तेन नारायणः स्मृतः ॥

इति नारदीययादवगिरिमाहात्म्यवचनाच्च योगवृत्त्या नारायणशब्दो विष्णुपर इति ज्ञायते ।

एवं नारायणशब्दस्य विष्णौ रूढेरभावे तत्र णत्वं न श्रूयेत। " पूर्वपदात्संज्ञायामगः " [पा. सू ८-४-३] इति सूत्रेण पूर्वपदस्थान्निमित्तात्परस्य नकारस्य गकारव्यवधानाभावे संज्ञायां णत्वविधानेन रूढेरभावे उद्देश्यतावच्छेदकानाक्रान्तत्वेन विधेयभूतं णत्वं न श्रूयेत ।

नच सर्वनामेत्यत्र उक्तनिमित्तसत्त्वेऽपि णत्वाभावेन णत्वं प्रत्युक्तनिमित्तस्याप्रयोजकत्वेन संज्ञाभावेऽपि नारायणशब्दे णत्वोपपत्तिरिति वाच्यम् । तत्र " सर्वादीनि[1] सर्वनामानि " इति सूत्रकृता णत्वाभावस्य निपातितत्वेन णत्वाभावोपपत्तेः[2] । प्रकृते णत्वोद्देश्यतावच्छेदकीभूतधर्माक्रान्तत्वं संज्ञाभावेन संभवतीति तत्र रूढिरुररीकरणीया ।

ननु कैवल्योपनिषदि " उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्त"मिति कञ्चन देवं प्रस्तुत्य 'ज्ञात्वा तं मृत्युमत्येति, नान्यः पन्था विमुक्तये [कैवल्य, प्रथमखण्डः, मं. ७] इति शिवेतरावाचकशिववाचकानेकपदोपादानेन शिवज्ञानस्यैव मोक्षजनकत्वं तदितरज्ञानस्य मोक्षाजनकत्वं च प्रतिपादितम् ।

एवञ्च पुरुषसूक्तेऽपि ईशानेत्यभिधानश्रुत्या शिवज्ञानस्यैव मोक्षजनकत्वं तदितरज्ञानस्य मोक्षाजनकत्वं च 'तमेवं विद्वानि'त्यनेन

---

[1] पा सू. १-१-२७

[2] " निपातनाण्णत्वं न " इति भाष्योक्तव्याख्यानाश्रयणात् इष्टसिद्धेः, इत्यादि तत्त्वबोधिनी । (पृष्ठ २०८)

दर्शितमिति वक्तव्यमिति शिवस्य जगत्कारणतापरैव महोपनिषदिति कथं नारायणस्य सर्वोत्तमतेति चेन्न।

पुरुषसूक्ते विद्यमानेशानादिपदस्य शिववाचकत्वस्यैव निरासात्। अनेकप्रमाणैर्नारायणपरत्वस्यैवोपपादनाच्च। एवं नारायणस्य जगत्कारणत्वाभावे—

आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः॥
ततः स्वयम्भूर्भगवानव्यक्तो व्यञ्जयन्निदम्।
महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः॥
योऽसावतीन्द्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः।
सर्वभूतमयोऽचिन्त्यः स एव स्वयमुद्बभौ॥
सोऽभिध्याय शरीरात्स्वात् सिसृक्षुर्विविधाः प्रजाः।
अप एव ससर्जादौ तासु वीर्यमवासृजत्॥
तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्।
तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः॥

[मनु. अ. १, ५तः १० श्लो.]

इत्यनेन जगत्कारणचतुर्मुखजनकवस्तु प्रतिपाद्य तस्य शिवाद्यन्यत्वबोधनाय ''विष्णुर्नारायणः कृष्णः'' इत्यादिकोशरूढं नारायणपरं पदमभिधाय योगेनापि तत्पदं नारायणपरमिति ज्ञापनाय—

आपो नारा इति प्रोक्ता आपो वै नरसूनवः।
अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः॥

इति कथितम्। तथा—

विष्णोरायतनं ह्यापः स ह्यपां पतिरुच्यते।
तस्यैव सूनवस्तास्तु तस्मात्तासु च संस्मरेत्॥

इति योगयाज्ञवल्क्यवचनेन, नराज्जातानि तत्वानि नाराणीति ततो विदुः। तान्येवायतनं तस्य तेन नारायणः स्मृतः इति भारतवचनेनापि नारायणशब्दस्य विष्णौ योगवृत्त्यवगतेर्नारायणस्यैव सकलजगन्निदानचतुर्मुखकारणताऽऽवश्यकी।

एवं—

यथावत्कथिते देवान् ब्रह्मा प्राह ततः परम्।
परावरेशं शरणं व्रजध्वमसुरार्दनम्।
प्रधानपुंसोरुभयोः कारणं कार्यभूतयोः।
प्रणतार्तिहरं विष्णुं स वः श्रेयो विधास्यति।
एवमुक्त्वा सुरान्सर्वान् ब्रह्मा लोकपितामहः।
तुष्टाव वाग्भि (र) रिष्टाभिः परावरपतिं हरिम्।
यन्मायां भगवान्ब्रह्मा जानाति परमं पदम्।
तन्नतास्मज्जगद्धाम तत्सर्वान्तगमच्युतम्।
एवं ब्रह्मा तथैवायं सहरुद्रस्त्रिलोचनः।
सर्वादित्यैस्समं पूषा पावकोऽयं सहाग्निभिः।
अश्विनौ वसवश्चेति ते चेतरमरुद्गणाः।
साध्या विश्वे तथा देवा देवेन्द्राश्च यमीश्वराः॥

इत्येवमादीनि पुराणवचनसहस्राणि नारायणस्य कृत्स्नजगत्कारणत्वाद्यनन्यसाधारणधर्मप्रतिपादकानि प्रमाणानि ।

ततश्चोक्तप्रमाणबलेन नारायण एव निखिलजगत्कारणं परतत्वमिति सिध्यति ।

ननु यथा शिवादिनाम्नां योगेन विष्णौ प्रवृत्तिः तथा शिवोऽपि जगत्कारणं स्यात् । न च नारायणशब्दस्य न शिववाचकता । शिवे नारायणशब्दस्य रूढेरभावेन तत्र[1] णत्वादिसत्त्वादिति वाच्यम् । शरण्ये त्र्यम्बके देवि नारायणि नमोऽस्तु ते । इति गौर्यां नारायणीशब्दप्रयोगान्नारायणस्य पत्नी नारायणीति वक्तव्यतया नारायणशब्दोऽपि शिवे रूढ इति णत्वोपपत्तिरिति वाच्यम् । नारायणीत्यत्र नारायणस्य पत्नीति न विवक्षितम् । किन्तु नारायणस्येयं नारायणीति[2] । ततश्च नारायणभक्तिमत्वात् नारायणीति व्यवह्रियते गौरी ।

यदि पत्न्यर्थकतयैव तथा व्यवहार इष्यते तदा महिषीति अभिषिक्तराज्ञीव्यवहारात् महिषपदबोध्यः राजा स्यात् । अधिकं "युक्तिमल्लिका" तोऽवसेयम् । ततश्च नारायणशब्दो न कथञ्चिदपि शिववाचक इति ।

तदुक्तमभियुक्तैः—"णत्वं परं बाधते" इति । तथाच निर्बाधान्नारायण एव जगत्कारणमिति ।

---

[1] रूढिसूचकेत्यादिः

[2] कृष्णस्य इयं कृष्णा द्रौपदीतिवत् ।

एतेन "हिरण्यगर्भस्समवर्तताग्र" इत्यादेः हिरण्यगर्भ एव जगत्कारणम् । "अम्भस्यपारे" इत्यत्रापि, "प्रजापतिश्चरति गर्भे अन्तः, स नो बन्धुर्जनिता स विधाते"ति प्रजापतिशब्ददर्शनात् । सूर्याचन्द्रमसौ धाता यथापूर्वकल्पयत्" इति वाक्यान्तराच्च । ततश्च नारायण एव परतत्वमित्यसङ्गतमिति निरस्तम् ।

न ब्रह्मा नेशान इत्यादिश्रुत्या सर्गाद्यकालसत्त्वस्य हिरण्यगर्भे निषेधेन तस्योक्तरुद्राद्विशेषाभावात् । एवं अम्भस्यपारे इत्यनुवाके, "यमन्तस्समुद्रे कवयोऽवयन्ती"त्युक्तसमुद्रशायित्वस्य "यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तादि"ति प्रतिपन्नतमसः पारवर्तित्वस्य 'सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि" इति श्रुतादित्यवर्णवत्पुरुषत्वस्य य एनं विदुरमृतास्ते भवन्तीत्यावेदितमोक्षोपायज्ञानविषयत्वस्य विश्वतश्चक्षुरुत विश्वतोमुख इत्यादिप्रतिपन्नसहस्रशीर्षत्वादिज्ञापकविश्वतश्चक्षुष्ट्वादेर्हिरण्यगर्भेऽसम्भवेन तस्योक्तवाक्याविषयतया न जगत्कारणत्वप्रसक्तिः । एवं—

"नाहं न च शिवोऽन्ये च तच्छक्त्येकांशभागिनः ।
बालः क्रीडनकैर्यद्वत्क्रीडतेऽस्माभिरच्युतः ।"

इति ब्रह्मवैवर्तवचनेन ब्रह्मणोऽपि नारायणादवरत्वावगमात् । "नामानि सर्वाणि यमाविशन्ति, यो देवाना"मित्यादिप्रमाणैः तत्तच्छब्दप्रवृत्तिनिमित्तपौष्कल्यादिमत्तया विद्वद्रूढिमहायोगाभ्यां प्रजापत्यादिशब्दवाच्यत्वेन नारायणस्येति उक्तवाक्यविरोधाभावेन स एव चेतनाऽचेतनात्मकनिखिलजगत्कारणमित्यविवादम् ।

द्वैततत्त्वदीपनोदाहृताः आकरग्रन्थाः

१. दुरितापहारस्तोत्रम्
२. यजुर्वेदः
३. वासिष्ठम्
४. मनुस्मृतिः
५. गीता
६. भागवतम्
७ न्यायसुधा
८. अनुव्याख्यानम्
९. नारायणोपनिषत्
१०. कठोपनिषत्
११. ब्रह्मसूत्राणि
१२. ब्रह्मसूत्रभाष्यम्
१३. ऋग्वेदः
१४ सुभाषितरत्नभाण्डागारम्
१५. यजुर्ब्राह्मणम्
१६. तैत्तिरीयोपनिषत्
१७. तैत्तिरीयानन्दवल्ली
१८. तत्त्वप्रकाशिका
१९. मध्वाध्वकण्टकोद्धारः
२०. युक्तिमल्लिका
२१. स्कान्दपुराणम्
२२. श्रीमुष्णमाहात्म्यम्
२३. वायुपुराणम्
२४. ब्रह्माण्डपुराणम्
२५. मध्वतन्त्रमुखभूषणम्
२६. चतुर्मुखनाडीग्रन्थः
२७. नव्यदुरुक्तिशिक्षा
२८. छान्दोग्योपनिषत्
२९. ऐतरेयोपनिषत्
३०. बृहदारण्यक-
३१. श्वेताश्वतर-
३२. अथर्वशिर-
३३. नारायणाथर्वशिर-
३४. महोपनिषत्
३५. कैवल्य-
३६. शिवसंकल्पोपनिषत्
३७. सामसंहिता
३८ शतपथब्राह्मणम्
३९. बृहत्संहिता
४०. ब्राह्मपुराणम्

४१. वाराहपुराणम्
४२. महाभारतम्
४३. मनुस्मृतिः
४४. अंभ्रणीसूक्तम्
४५. वामनसूक्तम्
४६. अमरकोशः
४७. नारदीयपुराणे यादवगिरिमाहात्म्यम्
४८. सिद्धान्तकौमुदी
४९. व्याकरणमहाभाष्यम्
५०. योगयाज्ञवल्क्यम्
५१. ब्रह्मवैवर्तम्

पश्चाद्वाणी

एवं स्वयशोभूषितरत्नगर्भामण्डलानां श्रीसुशीलेन्द्रगुरुसार्वभौमानामन्तेवासिनः श्रीगुरुराजाचार्याः यशश्शरीराः गुर्वनुग्रहासादिततत्त्वज्ञानफलरूपमिमं ग्रन्थं सज्जनेभ्यः उपायनीकृत्य तिरोऽभूवन् । श्रीसुशीलेन्द्रतीर्थानां उपपञ्चविंशाः छात्रतल्लजाः श्रीमन्न्यायसुधाभिधं अनर्घं ग्रन्थरत्नं तत्समीप एव पाठं पाठं गुरुकृतसुधामङ्गलमहोत्सवमप्यन्वभूवन् इति श्रूयते । तेष्वन्यतमानां अस्य द्वैततत्त्वदीपनग्रन्थस्य निर्मातॄणां श्रीगुरुराजाचार्याणां विषये तु न कोऽप्यन्यो जीवनेतिहासः उपलभ्यते । एतावत्तु निर्विवादम्, यदेते **श्रीसुशीलेन्द्रतीर्थानामेव छात्राः** इतः मार्कि षष्टिवर्षेभ्यः पूर्वमजीवन् इति ।

अत्रैकोऽन्यो विषयोऽवश्यमुल्लोखनीयः, यत् आधुनिकः कश्चन पण्डितः 'श्रीमन्मध्वमते हरिः परतरः' इति पद्यमतीव दुष्टम् इत्याचष्टे । स च तत्र श्रीमन्मध्वमतप्रमेयसंग्रहः सम्यङ् न कृतः, तत्र प्रोक्तप्रमेयजातमितरमतसाधारणं च, इत्याद्यभिप्रैतीति तस्याभिप्राय ऊह्यते । परंतु रामानुजमतीयप्रमेयसंग्राहकं श्रीमल्लक्ष्मणमौनि इत्येवंरूपेण पद्यमेवान्यद् विद्यते । तच्च श्रीताताचार्यैः ग्रथितम्, शांकरसिद्धान्तप्रमेयसंग्राहकं पद्यं च अप्पयदीक्षितैरचितमिति श्रूयते । एवंसति श्रीमन्मध्वमते इति पद्ये कथं वा दोषारोपणं क्रियते ? एतद्ग्रन्थकाराः गुरुराजाचार्याः प्राचीनाः प्रकाण्डपण्डिताः तैरेष श्लोक आदृतः, तत्रोक्तप्रमेयरत्नमेकं सम्यक्समर्थितम्, एवंसति कथं वा तस्मिन् पद्ये

दोषोद्घाटनमाधुनिकः कुर्यात् ? एतैरेव ग्रन्थकारैरेतत्पद्योक्तप्रमेयान्तराण्यपि एवमेव प्रबन्धरूपेण ग्रथितानि स्युरिति पुरोवाण्यामेव संसूचितमस्माभिः । कालान्तरे विषयमिमं विशेषतः प्रपञ्चयामः ।

अनया सेवया श्रीसुशीलेन्द्रतीर्थगुरूपास्यश्रीराघवेन्द्रतीर्थगुर्वन्तर्गतभारतीरमणमुख्यप्राणान्तर्गतः श्रीमूलरामचन्द्रः प्रीयताम्, सुप्रीतो वरदो भवतु इत्याशास्य विरमामः ।

—एवमाशासना संपादकमण्डली

प्रभा मुद्रणालयः, बेंगळूरु–560 004

प्रकटिष्यमाणग्रन्थाः

१ अद्वैतशिक्षा
२ सुधापरिमलः
३ सर्वमूलम्
४ भूगोळसंग्रहः
५ मन्त्ररत्नकोशः
६ गीताभावरत्नकोशः
७ तत्वप्रकाशिकाभावरत्नकोशः
८ मन्त्रार्थमञ्जरी
९ न्यायमुक्तावलिः
१० नरसिंहस्तुति व्याख्या
११ कुलिशः
१२ कृष्णामृतमहार्णवव्याख्या
१३ गीताभाष्यटीकाव्याख्या (श्रीराघवेन्द्रतीर्थीया)
१४ गीताभाष्य-नरहरितीर्थीया टीका
१५ गीताभाष्य-पद्मनाभतीर्थीया टीका
१६ अर्थालङ्कारमञ्जरी
१७ सारस्वतप्रपञ्चके विद्यामठद कोडुगे (कन्नड)
१८ द्वैतकोशः
१९ मन्दनन्दिनी
२० बृहद्धातुकोशः
२१ भागवतटीका (श्रीसुधीन्द्रतीर्थीया)
२२ श्रुत्यर्थसारः
२३ न्यायमौक्तिकमाला
२४ वादनक्षत्रमालिका
२५ विनायकादिपूजापद्धतिः